१॥

श्रीगणेशायनमः। ॐ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इंद्रो बृहस्पतिः। शं नो
विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि।
ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु तद्वक्तारमवतु। अवतु मां। अवतु वक्तारं। ॐ
शांतिः शांतिः ॥१॥ शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलं। साम संतानः। इत्युक्तः
शीक्षाध्यायः॥१॥ शीक्षापंच। सहनौ यशः। सहनौ ब्रह्मवर्चसं। अथातः संहिताया उपनि
षदं व्याख्यास्यामः। पंचस्वधिकरणेषु। अधिलोकमधिज्योतिषमधिविद्यमधि[illegible]जं
मध्यात्मं। ता महासंहिता इत्याचक्षते। अथाधिलोकं। पृथिवी पूर्वरूपं। द्यौरु[illegible]रूपं।
आकाशः संधिः॥१॥ वायुः संधानं। इत्यधिलोकं। अथाधिज्योतिषं। अग्निः पूर्व[illegible]। आदि
त्य उत्तररूपं। आपः संधिः। वैद्युतः संधानं। इत्यधिज्योतिषं। अथाधिविद्यं। [illegible]चार्यः
पूर्वरूपं॥२॥ अंतेवास्युत्तररूपं। विद्या संधिः। प्रवचनं संधानं। इत्यधिविद्यं। [illegible]थाधि
प्रजं। माता पूर्वरूपं। पितोत्तररूपं। प्रजा संधिः। प्रजननं संधानं। इत्यधिप्रजं॥३॥ अ
थाध्यात्मं। अधराहनुः पूर्वरूपं। उत्तराहनुरुत्तररूपं। वाक्संधिः। जिह्वा संधानं। इत्यध्यात्मं।

॥१॥

य एवमेता महासंꣳहिता मा पं २

इतिमे महासंꣳहिता॥ व्याख्याता वेद। संधीयते प्रजया पशुभिः। ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्ये
ण लोकेन॥४॥ संधिराचार्यः पूर्वरूपमित्यप्रजंलोकेन। यश्छंदसामृषभो विश्वरूपः। छंदो
भ्योध्यमृतात्संबभूव। स मेंद्रो मेधयास्पृणोतु। अमृतस्य देवधारणो भूयासं। शरीरं मे वि
चर्षणं। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवं। ब्रह्मणः कोशोसि मेधयापिहितः।
श्रुतं मे गोपाय। आवहंती वितन्वाना॥१॥ कुर्वाणा चीरमात्मनः। वासांसि मम गावश्च।
अन्नपाने च सर्वदा। ततो मे श्रियमावह। लोमशां पशुभिः सह स्वाहा। आमायंतु ब्रह्मचारि
णः स्वाहा। विमायंतु ब्रह्मचारिणः स्वाहा। प्रमायंतु ब्रह्मचारिणः स्वाहा। दमायंतु ब्रह्मचारि
णः स्वाहा। शमायंतु ब्रह्मचारिणः स्वाहा॥२॥ यशो जनेसानि स्वाहा। श्रेयान्वस्यसोसा
नि स्वाहा। तं त्वा भग प्रविशानि स्वाहा। स मा भग प्रविश स्वाहा। तस्मिन्सहस्रशाखे।
नि भगाहं त्वयि मृजे स्वाहा। यथापः प्रवतायंति। यथा मासा अहर्जरं। एवं मां ब्रह्मचारि
णः। धातरायंतु सर्वतः स्वाहा। प्रतिवेशोसि प्रमा भाहि प्रमा पद्यस्व॥७॥ वितन्वानामा
मायंतु ब्रह्मचारिणः स्वाहा धातरायंतु सर्वतः स्वाहैकं च॥८॥ भूर्भुवः सुवरिति वा एतास्तिस्रो
व्याहृतयः। तासामु ह स्मैतां चतुर्थीं। माहाचमस्यः प्रवेदयते। मह इति। तद्ब्रह्म। स आत्मा।

२॥

अंगान्यन्यादेवताः। भूरिति वा अयंलोकः। भुवइत्यंतरिक्षं। सुवारित्यसौ लोकः। महइत्यादित्यः॥
आदित्येनवावसर्वेलोकामहीयंते। भूरितिवा अग्निः। भुवइतिवायुः। सुवरित्यादित्यः॥
महइतिचंद्रमाः। चंद्रमसावावसर्वाणिज्योतींषिमहीयंते। भूरितिवा ऋचः। भुवइतिसामा
नि। सुवरितियजूंषि॥२॥ महइतिब्रह्म। ब्रह्मणावावसर्वेवेदामहीयंते। भूरितिवैप्राणः।
भुवइत्यपानः। सुवरितिव्यानः। महइत्यन्नं। अन्नेनवावसर्वेप्राणामहीयंते। तावाएता
श्चतस्रश्चतुर्धा। चतस्रश्चतस्रोव्याहृतयः। तायोवेद। सवेदब्रह्म। सर्वेस्मैदेवाबलिमा
वहंति। असौलोकोयजूंषिवेदइहेच॥५॥ सयएषोंतरहृदयआकाशः। तस्मिन्नयंपुरुषो
मनोमयः। अमृतोहिरण्मयः। अंतरेणतालुके। यएषस्तनइवावलंबते। सेंद्रयोनिः। यत्रा
सौकेशांतोविवर्तते। व्यपोह्यशीर्षकपाले। भूरित्यग्नौप्रतितिष्ठति। भुवइतिवायौ॥१॥ सुवरि
त्यादित्ये। महइतिब्रह्मणि। आप्नोतिस्वाराज्यं। आप्नोतिमनसस्पतिं। वाक्पतिश्चक्षुष्पतिः।
श्रोत्रपतिर्विज्ञानपतिः। एततोभवति। आकाशशरीरंब्रह्म। सत्यात्मप्राणारामंमनआ
नंदं। शांतिसमृद्धममृतं। इतिप्राचीनयोग्योपास्स्व। वायावमृतमेकंच। वायोमनआनंदइहेच।

॥२॥

प्र २

पृथिव्यंतरिक्षं द्यौर्दिशोवांतरदिशाः। अग्निर्वायुरादित्यश्चंद्रमानक्षत्राणि। आपओषधयो
वनस्पतय आकाश आत्मा। इत्यधिभूतं। अथाध्यात्मं। प्राणो व्यानोपानो उदानः समानः॥
चक्षुश्रोत्रंमनोवाक्त्वक्। चर्ममांसं स्नावास्थिमज्जा। एतदधिविधायऋषिरवोचत्। पांक्तं वा इदं
सर्वं। पांक्तेनैव पांक्तं स्पृणोतीति। सर्वमेकं च। ७॥ ओमिति ब्रह्म। ओमितीदं सर्वं। ओमि
त्येतदनुकृतिर्ह स्म वा अप्योश्रावयेत्याश्रावयंति। ओमिति सामानि गायंति। ओं शोमिति
शस्त्राणि शंसंति। ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति। ओमिति ब्रह्मा प्रसौति। ओमि
त्यग्निहोत्रमनुजानाति। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति। ब्रह्मैवोपाप्नो
ति। ८। ऋतं च स्वाध्यायप्रवचने च। सत्यं च स्वाध्यायप्रवचने च। तपश्च स्वाध्यायप्रव
चने च। दमश्च स्वाध्यायप्रवचने च। शमश्च स्वाध्यायप्रवचने च। अग्नयश्च स्वाध्यायप्रव
चने च। अग्निहोत्रं च स्वाध्यायप्रवचने च। अतिथयश्च स्वाध्यायप्रवचने च। मानुषं च स्वाध्या
यप्रवचने च॥ प्रजा च स्वाध्यायप्रवचने च। प्रजनश्च स्वाध्यायप्रवचने च। प्रजातिश्च
स्वाध्यायप्रवचने च। सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः। स्वाध्या

च ३

यप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः। प्र आ च स्वाध्यायप्रवचने च षट्र। अहं वृक्षस्य रेरिवा।
कीर्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणं सवर्चसं। सुमेधा अमृतोक्षितः। इ
ति त्रिशंकोर्वेदानुवचनं। ध। अहं ७ षट्। वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर।
स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातंतुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यं।
धर्मान्न प्रमदितव्यं। कुशलान्न प्रमदितव्यं। भूत्यै न प्रमदितव्यं। स्वाध्यायप्रवचनाभ्यां न प्रमदि
तव्यं। देवपितृकार्याभ्यां न प्रमदितव्यं। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदे
वो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि। तानि त्व
योपास्यानि। नो इतराणि। ये के चास्मच्छ्रेयांसो ब्राह्मणाः। तेषां त्वयासनेन प्रश्वसितव्यं। श्रद्धया दे
यं। अश्रद्धयादेयं। श्रिया देयं। ह्रिया देयं। भिया देयं। संविदा देयं। अथ यदि ते कर्मविचिकित्सा वा स्या वृत्तविचि कित्सा वा
स्तू। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामा स्युः। यथा ते तत्र वर्तेरन्।
तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः। अलूक्षा ध
र्मकामा स्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनि
षत्। एतदनुशासनं। एवमुपासितव्यं। एवमु चैतदुपास्यं। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं।

॥३॥

तान्नयोपास्या। भूस्या। तेषु वर्तेरन् सतच। शन्नो मित्रः शं वरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो बृ
हस्पतिः। शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्ष
ब्रह्मवादिषं। ऋतमवादिषं। सत्यमवादिषं। तन्मामावीत्। तद्वक्तारमावीत्। आवीन्माम्। आवी
द्वक्तारं। सत्यमवादिषं चत्वारि च॥८॥८॥ इति तैत्तिरीयशाखायामारण्यके अष्टमः प्रश्नः स
माप्तः॥ शुभमस्तु॥=॥=॥=॥=॥=॥=॥ शन्नः शीक्षां सहनौ यश्छन्दसामृषभः स यः पृ
थिव्यो। महस्तेषाह वदमन्ते च। शन्नो द्वादश॥ सहनाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै। ॐ मू॥ शान्तिः शान्तिः शान्तिः। ॐ। ॐ मू॥ ब्रह्मविदाप्नो
ति परं। तदेषाभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान्का
द्वा५ मान्सह। ब्रह्मणा विपश्चितेति। तस्माद्वा एतस्मादात्मन आकाशः संभूतः। आकाशाद्वायुः। वायो
रग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नं। अन्नात्पुरुषः। स वा
एष पुरुषोऽन्नरसमयः। तस्येदमेव शिरः। अयं दक्षिणः पक्षः। अयमुत्तरः पक्षः। अयमात्मा।
इदं पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥१॥ अन्नाद्वै प्रजाः प्रजायन्ते। याः काश्च पृथिवीं श्रिताः।
अथो अन्नेनैव जीवन्ति। अथैनदपि यन्त्यन्ततः। अन्नं हि भूतानां ज्येष्ठं। तस्मात्सर्वौषधमुच्यते।

।४॥

सर्वं वै तेऽन्नमाप्नुवंति। येऽन्नं ब्रह्मोपासते। अन्नंहि भूतानां ज्येष्ठं। तस्मात्सर्वौषधमुच्यते। अन्ना
द्भूतानि जायंते। जातान्यन्नेन वर्द्धंते। अद्यतेत्ति च भूतानि। तस्मादन्नं तदुच्यत इति। तस्माद्वा ए
तस्मादन्नरसमयात्। अन्योंतर आत्मा प्राणमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य
पुरुषविधतां। अन्वयं पुरुषविधः। तस्य प्राण एव शिरः। व्यानो दक्षिणः पक्षः। अपान उत्तरः पक्षः।
आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥२॥ प्राणं देवा अनुप्राणंति। मनु
ष्याः पशवश्च ये। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यते। सर्वमेव त आयुर्यंति ये प्राणं
ब्रह्मोपासते। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यत इति। तस्यैष एव शारीर आत्मा
यः पूर्वस्य। तस्माद्वा एतस्मात्प्राणमयात्। अन्योंतर आत्मा मनोमयः। तेनैष पूर्णः। स वा एष
पुरुषविध एव। तस्य पुरुषविधतां। अन्वयं पुरुषविधः। तस्य यजुरेव शिरः। ऋग्दक्षिणः प
क्षः। सामोत्तरः पक्षः। आदेश आत्मा। अथर्वांगिरसः पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति।
॥३॥ यतो वाचो निवर्त्तंते। अप्राप्य मनसा सह। आनंदं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति।
तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्मान्मनोमयात्। अन्योंतर आत्मा विज्ञा
नमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधतां॥

।४॥

अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्र
तिष्ठा। तदप्येष श्लोको भवति।४।। विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च। विज्ञानं देवाः सर्वे। ब्रह्म ज्ये
ष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्वान्कामान्समश्नु
ते इति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य। तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्मानन्दमयः।
तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्रियमेव शिरः।
मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः। आनन्द आत्मा। ब्रह्म पुच्छं प्रतिष्ठा। तदप्येष श्लोको भ
वति।५।। असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति।
तस्यैष एव शारीर आत्मा। यः पूर्वस्य। अथातोऽनुप्रश्नाः। उताविद्वानमुं लोकं प्रेत्य। कश्चन गच्छती।
आहो विद्वानमुं लोकं प्रेत्य। कश्चित्समश्नुता उ। सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत।
स तपस्तप्त्वा। इदं सर्वमसृजत। यदिदं किंच। तत्सृष्ट्वा। तदेवानुप्राविशत्। तदनुप्रविश्य। सच्च त्यच्चाभ
वत्। निरुक्तं चानिरुक्तं च। निलयनं चानिलयनं च। विज्ञानं चाविज्ञानं च। सत्यं चानृतं च। स
त्यमभवत्। यदिदं किंच। तत्सत्यमित्याचक्षते। तदप्येष श्लोको भवति।६।। असद्वा इदमग्र आसीत्।
ततो वै सदजायत। तदात्मानं स्वयमकुरुत। तस्मात्तत्सुकृतमुच्यत इति। यद्वै तत्सुकृतम्। रसो वै सः। रसं

ह्येवायं लब्ध्वानंदी भवति। को ह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनंदो न स्यात्। एष ह्येवानं
दयाति। यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयने भयं प्रतिष्ठां विंदते। अथ सोभयंगतो भ
वति। यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते। अथ तस्य भयं भवति। तत्वेव भयं विदुषो मन्वानस्य।
तदप्येष श्लोको भवति॥७॥ भीषास्माद्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेंद्रश्च।
मृत्युर्धावति पंचम इति। सैषानंदस्य मीमांसा भवति। युवा स्यात्साधुयुवाध्यायकः। आशि
ष्ठो दृढिष्ठो बलिष्ठः। तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनंदः। ते ये शतं मा
नुषा आनंदाः॥१॥ स एको मनुष्य गंधर्वाणामानंदः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं मनु
ष्य गंधर्वाणामानंदाः। स एको देवगंधर्वाणामानंदः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवगं
धर्वाणामानंदाः। स एकः पितॄणां चिरलोकलोकानामानंदः। श्रोत्रियस्य चाकामहतस्य। ते ये श
तं पितॄणां चिरलोकलोकानामानंदाः। स एक आजानजानां देवानामानंदः॥२॥ श्रोत्रियस्य
चाकामहतस्य। ते ये शतमाजानजानां देवानामानंदाः। स एकः कर्मदेवानां देवानामानंदः।
ये कर्मणा देवानपियंति। श्रोत्रियस्य चाकामहतस्य। ते ये शतं कर्मदेवानां देवानामानंदाः। स
एको देवानामानंदः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं देवानामानंदाः। स एक इंद्रस्यानंदः॥३॥
श्रोत्रियस्य चाकामहतस्य। ते ये शतमिंद्रस्यानंदाः। स एको बृहस्पतेरानंदः। श्रोत्रियस्य चाकाम

) एतमानंदमयमात्मानमुपसंक्रामति ५

हतस्य। तेये शतं बृहस्पतेरानंदाः। स एकः प्रजापतेरानंदः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं प्र
जापतेरानंदाः। स एको ब्रह्मण आनंदः। श्रोत्रियस्य चाकामहतस्य॥ ८॥ स यश्चायं पुरुषे। यश्चा
सावादित्ये। स एकः। स य एवंवित्। अस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसंक्रामति। एतं
प्राणमयमात्मानमुपसंक्रामति। एतं मनोमयमात्मानमुपसंक्रामति। एतं विज्ञानमयमात्मा
नमुपसंक्रामति। तदप्येष श्लोको भवति। यतो वाचो निवर्तंते। अप्राप्य मनसा सह। आनंदं
ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति। एतं ह वाव न तपति। किमहं साधु नाकरवं। किमहं पा
पमकरवमिति। स य एवं विद्वानेते आत्मानं स्पृणुते। उभे ह्येवैष एते आत्मानं स्पृणुते। य एवं
वेद। इत्युपनिषत्॥९॥६७॥ ८॥ ॐम्। भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अ
धीहि भगवो ब्रह्मेति। तस्मा एतत्प्रोवाच। अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति। तं होवाच।
यतो वा इमानि भूतानि जायंते। येन जातानि जीवंति। यत्प्रयंत्यभिसंविशंतीति। तद्विजि
ज्ञासस्व। तद्ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥१॥ अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव ख
ल्विमानि भूतानि जायंते। अन्नेन जातानि जीवंति। अन्नं प्रयंत्यभिसंविशंतीति। तद्विज्ञाय।
पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म विजिज्ञा

त५

॥६॥

सस्व। तपो ब्रह्मेति। स तपोतप्यत। स तपस्तप्त्वा॥२॥ प्राणो ब्रह्मेति व्यजानात्। प्राणाद्ध्येव खल्विमानि
भूतानि जायंते। प्राणेन जातानि जीवंति। प्राणं प्रयंत्यभिसंविशंतीति। तद्विज्ञाय। पुनरेव वरुणं
पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मे
ति। स तपोतप्यत। स तपस्तप्त्वा॥३॥ मनो ब्रह्मेति व्यजानात्। मनसो ह्येव खल्विमानि भू
तानि जायंते। मनसा जातानि जीवंति। मनः प्रयंत्यभिसंविशंतीति। तद्विज्ञाय पुनरेव वरुणं
पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो
ब्रह्मेति स तपोतप्यत स तपस्तप्त्वा॥४॥ विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि
भूतानि जायंते। विज्ञानेन जातानि जीवंति। विज्ञानं प्रयंत्यभिसंविशंतीति। तद्विज्ञाय। पुन
रेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तं होवाच। तपसा ब्रह्म विजिज्ञासस्व।
तपो ब्रह्मेति। स तपोतप्यत। स तपस्तप्त्वा॥५॥ आनंदो ब्रह्मेति व्यजानात्। आ
नंदाद्ध्येव खल्विमानि भूतानि जायंते। आनंदेन जातानि जीवंति। आनंदं प्रयंत्यभिसंविशं
तीति। सैषा भार्गवी वारुणी विद्या। परमे व्योमन्प्रतिष्ठिता। य एवं वेद प्रतितिष्ठति। अन्न
वानन्नादो भवति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या॥६॥

॥६॥

अन्नं न निंद्यात्। तद्व्रतं। प्राणो वा अन्नं। शरीरमन्नादं। प्राणे शरीरं प्रतिष्ठितं। शरीरे प्राणः प्रति
ष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितं। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्ना
दो भवति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या। ७। अन्नं न परिचक्षी
त। तद्व्रतं। आपो वा अन्नं। ज्योतिरन्नादं। अप्सु ज्योतिः प्रतिष्ठितं। ज्योतिष्यापः प्रतिष्ठिताः।
तदेतदन्नमन्ने प्रतिष्ठितं। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भ
वति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या। ८। अन्नं बहु कुर्वीत। तद्व्रतं।
पृथिवी वा अन्नं। आकाशोऽन्नादः। पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता।
तदेतदन्नमन्ने प्रतिष्ठितं। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति। अन्नवानन्नादो भ
वति। महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्त्या। ९। न कंचन वसतौ प्रत्याचक्षीत। त
द्व्रतं। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते। एतद्वै मुखतो
ऽन्नꣳ राद्धं। मुखतोऽस्मा अन्नं राध्यते। एतद्वै मध्यतोऽन्नꣳ राद्धं। मध्यतोऽस्मा अन्नꣳ राध्यते। एतद्वा अन्त
तोऽन्नꣳ राद्धं। अन्ततोऽस्मा अन्नꣳ राध्यते। १। य एवं वेद। क्षेम इति वाचि। योगक्षेम इति प्राणापा
नयोः। कर्मेति हस्तयोः। गतिरिति पादयोः। विमुक्तिरिति पायौ। इति मानुषीः समाज्ञाः। अथ
दैवीः। तृप्तिरिति वृष्टौ। बलमिति विद्युति। २। यश इति पशुषु। ज्योतिरिति नक्षत्रेषु। प्रजा

तिरमृतमानंद इत्युपस्थे। सर्वमित्याकाशे। तत्प्रतिष्ठेत्युपासीत। प्रतिष्ठावान्भवति। तन्मह इत्युपासी
त।। महान्भवति। तन्मन इत्युपासीत। मानवान्भवति।।३।। तन्नम इत्युपासीत। नम्यंतेस्मै कामाः।।
तद्ब्रह्मेत्युपासीत। ब्रह्मवान्भवति। तद्ब्रह्मणः परिमर इत्युपासीत। पर्येणं म्रियंते द्विषंतः सपत्नाः।
परि येऽप्रिया भ्रा। तृव्याः। स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः।।५।। स य एवंवित्। अस्मा
ल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसंक्रम्य। एतं प्राणमयमात्मानमुपसंक्रम्य। एतं मनोम
यमात्मानमुपसंक्रम्य। एतं विज्ञानमयमात्मानमुपसंक्रम्य। एतमानंदमयमात्मानमुप
संक्रम्य। इमाँल्लोकान्कामान्नी कामरूप्यनुसंचरन्। एतत्साम गायन्नास्ते। हा३वु हा३वु हा३
वु। अहमन्नमहमन्नमहमन्नं। अहमन्नादो३हमन्नादो३हमन्नादः। अहं श्लोककृद
हं श्लोककृदहं श्लोककृत्। अहमस्मि प्रथमजा ऋता३स्य। पूर्वं देवेभ्योऽमृतस्य ना३
भायि। यो मा ददाति स इदेव मा३वाः। अहमन्नमन्नमदंतमा३द्मि। अहं विश्वं भुवनम
भ्यभवा३म्। सुवर्न ज्योतीः। य एवं वेद। इत्युपनिषत्। सह नाववतु। सह नौ भुनक्तु। सह वीर्यं कर
वावहै। तेजस्वि नावधीतमस्तु मा वि॰ द्विषावहै।। ॐ शांतिः शांतिः शांतिः।।७।।७।।

विदुस्ततास्ते प्रवदंति। अद्भ्यः संभृतो हिरण्यगर्भ इत्यष्टौ। एषो ह देवः प्रदिशोनु सर्वाः पूर्वो ह जातः
स उ गर्भे अंतः। स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः॥ विश्व
तश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात्। सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृ
थिवी जनयं देव एकः। वेनस्तत्पश्यन्पूर्वा विश्वा भुवनानि विद्वान्यत्र विश्वं भवत्येकनीडं॥ यस्मि
न्निदं सं च वि चैति सर्वं स ओतः प्रोतश्च विभुः प्रजासु। प्र तद्वोचे अमृतं नु विद्वान् गंधर्वो
नाम निहितं गुहासु॥ ३॥ त्रीणि पदा निहिता गुहास्य यस्तानि वेद स पितुः पितासत्॥ स
नो बंधुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा। यत्र देवा अमृतमानशाना
स्तृतीये धामान्यभ्यैरयंत॥ परि द्यावापृथिवी यंति सद्यः परि लोकान्परि दिशः परि
स्वः। ऋतस्य तंतुं विततं विचृत्य तदपश्यत्तदभवत्प्रजासु। परीत्य लोकान्परीत्य भूता
नि परीत्य सर्वाः प्रदिशो दिशश्च। प्रजापतिः प्रथमजा ऋतस्यात्मनात्मानमभि सं
बभूव॥ सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं। सनिं मेधामयासिषं॥ उद्दीप्यस्व जात
वेदोपघ्नन्निरृतिं मम। ४॥ पशूंश्च मह्यमावह जीवनं च दिशो दश। मा नो हिंसीज्जा

तवेदो॥ मश्वं पुरुषं जगत्। अंबिके पृत्रदग्न आगहि श्रियामा कश्यपात या। पुरुषस्य विद्म सहस्राक्षस्य
महादेवस्य धीमहि। तन्नो रुद्रः प्रचोदयात्। तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदया
त्॥ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि। तन्नो दंतिः प्रचोदयात्। तत्पुरुषाय विद्महे चक्रतुंडाय धीम
हि॥५॥ तन्नो नंदिः प्रचोदयात्। तत्पुरुषाय विद्महे महासेनाय धीमहि। तन्नः षण्मुखः प्रचोदयात्।
तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि। तन्नो गरुडः प्रचोदयात्॥ वेदात्मनाय विद्महे हिर
ण्यगर्भाय धीमहि। तन्नो ब्रह्म प्रचोदयात्। नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः
प्रचोदयात्। वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि। तन्नो नारसिंहः प्रचोदयात्। भास्करा
य विद्महे महद्द्युतिकराय धीमहि। तन्नो आदित्यः प्रचोदयात्। वैश्वानराय विद्महे लालीला
य धीमहि। तन्नो अग्निः प्रचोदयात्। कात्यायनाय विद्महे कन्यकुमारि धीमहि। तन्नो दुर्गिः
प्रचोदयात्॥ सहस्रपरमा देवी शतमूला शतांकुरा। सर्वं हरतु मे पापं दूर्वा दुस्वप्ननाशिनी॥
कांडात्कांडात्प्ररोहंती पुरुष पुरुषः परि॥७॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च। या शतेन
प्रतनोषि सहस्रेण विरोहसि। तस्यास्ते देवीष्टके विधेम हविषा वयं॥ अश्वक्रांते रथक्रांते

विष्णुक्रांते वसुंधरे। शिरसा धारयिष्यामि रक्षस्व मां पदे पदे। भूमिर्धेनुर्धरणी लोकधारिणी।
उद्धृतासि वराहेन कृष्णेन शतबाहुना। मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतं। मृत्तिके ब्रह्मदत्ता
सि काश्यपेनाभिमंत्रिता। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं॥८॥ मृत्तिके प्रतिष्ठिते सर्वं
तन्मे निर्णुद मृत्तिके। त्वया हतेन पापेन गच्छामि परमां गतिं॥ यत इंद्र भयामहे ततो नो अभयं
कृधि। मघवं छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि। स्वस्तिदा विशस्पतिर्वृत्रहा विमृ
धो वशी। वृषेंद्रः पुर एतु नः स्वस्तिदा अभयंकरः। स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्व
वेदाः॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु। आपांतमन्युस्तृपलप्रभ
र्माधुनिः शिमीवांछरुमां ऋजीषी। सोमो विश्वान्यतसावनानि नार्वागिंद्रं प्रतिमानानि
देभुः॥९॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः। स बुध्निया उप
मा अस्य विष्ठाः सतश्च योनिमसतश्च विवः। स्योना पृथिवि भवानृक्षरा निवेशनी। यच्छा
नः शर्म सप्रथाः। गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं।
श्रीर्मे भजतु। अलक्ष्मीर्मे नश्यतु। विष्णुमुखा वै देवा छंदोभिरिमाँल्लोकाननपजय्यमभ्यज
यन्॥१४

महां इंद्रो वज्रबाहुः षोडशी शर्म यछतु ॥१॥ स्वस्ति नो मघवा करोतु हंतु पाप्मानं यो स्मान्द्वेष्टि ॥ सोमानं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवंतं य औशिजः । शरीरं यज्ञशमलं कुसीदं तस्मिं सीदतु यो स्मान्द्वेष्टि । चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूता अति पाप्मानमरातिं तरेम ॥ सजोषा इंद्र सगणो मरुद्भिः सोमं पिब वृत्रहं शूर विद्वान् ॥ जहि शत्रूंरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः । सुमित्रा न आप ओषधयः संतु दुर्मित्रास्तस्मै भूयासुर्यो स्मान्द्वेष्टि यं च वयं द्विष्मः । आपो हि ष्ठा मयोभुवः ता न ऊर्जे दधातन ॥११॥ महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः । हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः ॥ यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः । यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं । तन्न इंद्रो वरुणो बृहस्पतिः सविता च पुनंतु पुनः पुनः । नमो ऽग्नये ऽप्सुमते नम इंद्राय नमो वरुणाय नमो वारुण्यै नमो ऽद्भ्यः ॥१२॥ यदपां क्रूरं यदमेध्यं यदशांतं तदपगच्छतात् । अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात् । तन्नो वरुणो राजा पाणिना ह्यवमर्शतु । सोहमपापो विरजो निर्मु

मो मुच्यते किल्बिषः। नाकस्यपृष्ठमारुह्यगच्छेद्ब्रह्मसलोकतां। यथाश्वमेधावरुणः सपुनात्वघमर्षणः॥
इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमं सचतापरुष्ण्या। असिक्न्यामरुद्वृधेवितस्तयार्जीकी
येशृणुह्या सुषोमया। ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत। ततोरात्रिरजायत ततः स
मुद्रो अर्णवः॥१३॥ समुद्रादर्णवादधिसंवत्सरो अजायत। अहोरात्राणिविदधद्विश्वस्य
मिषतो वशी॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत्। दिवं च पृथिवीं चांतरिक्षमथो स्वः॥
यत्पृथिव्यां रजस्वमांतरिक्षे विरोदसी। इमांस्तदापो वरुणः पुनात्वघमर्षणः। पुनंतु व
सवः पुनातुवरुणः पुनात्वघमर्षणः। एष भूतस्य मध्ये भुवनस्य गोप्ता। एष पुण्यकृतां
लोकानेष मृत्योर्हिरण्मयं। द्यावापृथिव्योर्हिरण्मयं संश्रितं स्वः॥१५॥ स नः स्वः संशि
शाधि। आर्द्रं ज्वलति ज्योतिरहमस्मि। ज्योतिर्ज्वलति ब्रह्माहमस्मि। योहमस्मि ब्रह्मा
हमस्मि। अहमस्मि ब्रह्माहमस्मि। अहमेवाहं मां जुहोमि स्वाहा। अकार्यकार्यवकीर्णी स्ते
नो भ्रूणहा गुरुतल्पगः। वरुणोपामघमर्षणः स्तस्मात्पापात्प्रमुच्यते॥ रजोभूमिस्त्वमां
रोदयस्व प्रवदंति धीराः। आक्रांत्समुद्रः प्रथमे विधर्मं जनयन्प्रजा भुवनस्य राजा। विश्वा

पवित्रे आधिसानो अध्येवहृत्सोमो वाद धावेनदुंदुः ॥१६॥ परस्ता घ्रूघ्रोगुहासुसमचक्रे तुंडा
यधीमहि तीक्ष्णदंष्ट्राय धीमहि पारप्राति क्षितं देभुर्यच्छतुदधातना प्यात्नेवः सुवीराः जैकेच ॥८०॥
रुद्रो रुद्रश्च दंतिश्च नंदिः षण्मुख एव च । गरुडो ब्रह्म विष्णुश्च नारसिंहस्तथैव च । आदित्योऽग्नि
श्च दुर्गिश्च क्रमेण द्वादशांभसि । मम चवसवे नामभा वैकाभायनाय ॥ जातवेदसे सुनवाम सो
ममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्य ग्निः ॥
तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टां । दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तर
से नमः । अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला न उ
र्वी भवा तोकाय तनयाय शंयोः । विश्वानि नो दुर्गहा जातवेदः सिंधुं न नावा दुरितातिपर्षि । अ
ग्ने अत्रिवन्नमसा गृणानो अस्माकं बोध्यविता तनूनां । पृतना जितं सहमानमुग्रमग्निं हु
वेम परमात्सधस्थात् । स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः । प्रत्नोषिक
मीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि । स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व
स्व । गोभिर्जुष्टमयुजो निषिक्तं तवेंद्र विष्णोरनुसंचरेम । नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक
इह मादयंतां ॥१॥ भूरन्नमग्नये पृथिव्यै स्वाहा भुवोऽन्नं वायवेऽन्तरिक्षाय स्वाहा सुवरन्नमादित्या

॥११॥

यादिवेस्वाहा भूर्भुवः सुवरन्नं चन्द्रमसे दिग्भ्यः स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरन्नमोम् ॥७॥
भूरग्नये पृथिव्यै स्वाहा भुवो वायवेंतरिक्षाय स्वाहा सुवरादित्याय दिवे स्वाहा भूर्भुवः सुवश्चंद्रमसे
दिग्भ्य स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरग्न ओम् ॥७॥ भूरग्नये च पृथिव्यै च महते च
स्वाहा भुवो वायवे चांतरिक्षाय च महते च स्वाहा सुवरादित्याय च दिवे च महते च स्वाहा भूर्भुवः सु
वश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सु
वर्महरोम् ॥७॥७॥ पाहि नो अग्न एनसे स्वाहा। पाहि नो विश्ववेदसे स्वाहा। यज्ञं पाहि विभावसो
स्वाहा ॥ सर्वं पाहि शतक्रतो स्वाहा ॥७॥ पाहि नो अग्न एकया। पाह्युत द्वितीयया ॥ पाह्यू
र्जं तृतीयया। पाहि गीर्भिश्चतसृभिर्वसो स्वाहा। ७ यश्छंदसामृषभो विश्वरूपश्छंदोभ्यश्छं
दांस्याविवेश। सचाꣳशिक्यः पुरो वाचोपनिषदिंद्रो ज्येष्ठ इंद्रियाय ऋषिभ्यो नमो दे
वेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवश्छंद ओम् ॥८॥ नमो धारणं मे अस्त्वनिराकरणं धारयिता ब्रह्मणे
भूयासं कर्णयोः श्रुतं मा च्योढ्वं ममामुष्य ओम् ॥९॥ ऋतं तपः सत्यं तपः श्रुतं तपः शांतं तपो दमः
स्तपः शमस्तपो दानं तपो यज्ञं तपो भूर्भुवः सुवर्ब्रह्मैतदुपास्यैतत्तपः ॥१०॥ यथा वृक्षस्य संपुष्पितस्य
दूराद्गंधो वात्येवं पुण्यस्य कर्मणो दूराद्गंधो वाति

धा २ ॥११॥

यथासिधारां कर्तेवहितामवक्रामे यद्युवेयुवे हवा विह्वयिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मा
नं जुगुप्सेत्॥ ९॥ अणोरणीयान्महतो महीयानात्मा गुहायां निहितोस्य जंतोः। तमक्रतुं पश्यति
वीतशोको धातुः प्रसादान्महिमानमीशं। सप्त प्राणाः प्रभवंति तस्मात्सप्तार्चिषः समिधः सप्त जि
ह्वाः। सप्त इमे लोका येषु चरंति प्राणा गुहाशया निहिताः सप्त सप्त। अतः समुद्रा गिरयश्च सर्वे स्मा
त्स्यंदंते सिंधवः सर्वरूपाः। अतश्च विश्वा ओषधयो रसाश्च येनैष भूतस्तिष्ठत्यंतरात्मा। ब्रह्मा देवानां
पदवीः कवी[illegible]नामृषिर्विप्राणां महिषो मृगाणां। श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्र
मत्येति रेभन्। अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयंतीं सरूपां। अजो ह्येको जुषमा
णोनुशेते जहात्येनां भुक्तभोगामजोन्यः। हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दु
रोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्। घृतं मिमिक्षिरे
घृतमस्य योनिर्घृते श्रितो घृतमुवस्य धाम। अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ व
क्षि हव्यं। समुद्रादूर्मिर्मधुमां उदारदुपांशुना सममृतत्वमानट्। घृतस्य नाम गुह्यं यदस्ति। जि
ह्वा देवानाममृतस्य नाभिः। वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धारयामा नमोभिः। उप ब्रह्मा शृण
वच्छस्यमानं चतुःशृंगोवमीद्गौर एतत्। चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश। त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्व
विंदन्। इंद्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः। यो देवानां प्रथमं पुरस्ताद्विश्वाधियो
रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानं स नो देवः शुभया स्मृत्या संयुनक्तु। यस्मात्परं नापर
मस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण
सर्वं। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं गुहायां विभ्राजते
यद्यतयो विशंति। वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः। ते ब्रह्मलोकेतु
परांतकाले परामृतात्परिमुच्यंति सर्वे। दहं विपापं परमेश्मभूतं यत्पुंडरीकं पुरमध्यसंस्थं। तत्रापि
दहं गगनं विशोकं तस्मिन्यदंतस्तदुपासितव्यं। यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः। तस्य प्रकृ
तिलीनस्य यः परस्स महेश्वरः॥ १२॥ अजो न्य आविवेशास वैचेता रित्या॥ सहस्रशीर्षं देवं विश्वा
क्षं विश्वशंभुवं। विश्वं नारायणं देवमक्षरं परमं पदं॥ विश्वतः परमं नित्यं विश्वं नारायणं हरिं।
विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति। पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं। नारायणं
महाज्ञेयं विश्वात्मानं परायणं। नारायणः परो ज्योतिरात्मा नारायणः परः। नारायणः परं ब्रह्म
तत्वं नारायणः परः। नारायणः परो ध्याता ध्यानं नारायणः परः। यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा

अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। अनंतमव्ययं कविं समुद्रेंतं विश्वशंभुवं। पद्मकोशप्रती
काशं हृदयं चाप्यधोमुखं। अधो निष्ट्या वितस्यांते नाभ्यामुपरि तिष्ठति। ज्वालमालाकुलं भाति विश्व
स्यायतनं महत्। संततं शिलाभिस्तु लंबत्याकोशसंनिभं। तस्यांते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठि
तं। तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः। सोग्रभुग्विभजंतिष्ठन्नाहारमजरः कविः। तिर्यगूर्ध्व
मधःशायी रश्मयस्तस्य संतता। संतापयति स्वं देहमापादतलमस्तकः। तस्य मध्ये वह्निशिखा अणीयो
र्ध्वा व्यवस्थितः। नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा। नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा।
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्म स शिवः स हरिः सेंद्रः सोक्षरः परमः स्वराट्। ॥१३॥
अपि वा संततापयद्धु ॥ आदित्यो वा एष एतन्मंडलं तपति तत्र ता ऋचः सेत्तदृचां मंडलं स ऋचां लोकोथ य
एष एतस्मिन्मंडले र्चिर्दीप्यते तानि सामानि स साम्नां लोकोथ य एष एतस्मिन्मंडलेर्चिषि पुरुषस्ता
नि यजूंषि स यजुषां मंडलं स यजुषां लोकः सैषा त्रय्येव विद्या तपति य एषोन्तरादित्ये हिरण्मयः
पुरुषः ॥१४॥ आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्रमात्मा मनो मन्युर्मनुर्मृत्युः सत्यो मित्रो वायु
राकाशः प्राणो लोकपालः कः किं कं तत्सत्यमन्नममृतो जीवो विश्वः कतमः स्वयंभु ब्रह्मैतदमृत एष पुरु
ष एष भूतानामधिपतिर्ब्रह्मणः सायुज्यं सलोकतामाप्नोत्येतासामेव देवतानां सायुज्यं सार्ष्टितां

११३५

समानलोकतामाप्नोतियएवंवेदेत्युपनिषत्॥१५॥निधनपतयेनमः।निधनपतांतिकायनमः।ऊर्ध्वायनमः।
ऊर्ध्वलिंगायनमः।हिरण्यायनमः।हिरण्यलिंगायनमः।सुवर्णायनमः।सुवर्णलिंगायनमः।दिव्यायनमः।
दिव्यलिंगायनमः।भवायनमः।भवलिंगायनमः।शर्वायनमः।शर्वलिंगायनमः।शिवायनमः।शिवलिं
गायनमः।ज्वलायनमः।ज्वललिंगायनमः।आत्मायनमः।आत्मलिंगायनमः।परमायनमः।परमलिं
गायनमः।एतत्सोमस्यसूर्यस्यसर्वलिंगंस्थापयतिपाणिमंत्रंपवित्रं॥१६॥सद्योजातंप्रपद्यामि
सद्योजातायवैनमोनमः।भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः॥१७॥वामदेवायनमोज्येष्ठायनमः
श्रेष्ठायनमोरुद्रायनमः।कालायनमः।कलविकरणायनमोबलविकरणायनमोबलायनमोबलप्र
मथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः॥१८॥अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः।
सर्वेभ्यःसर्वशर्वेभ्योनमस्ते अस्तुरुद्ररूपेभ्यः॥१९॥तत्पुरुषायविद्महेमहादेवायधीमहि।तन्नोरुद्रः
प्रचोदयात्॥२०॥ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा
शिवोमेअस्तुसदाशिवोम्॥२१॥नमोहिरण्यबाहवेहिरण्यवर्णायहिरण्यरूपायहिरण्यपतयेंबिका
पतयउमापतयेपशुपतयेनमोनमः॥२२॥ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं।ऊर्ध्वरेतंविरूपा
क्षंविश्वरूपायवैनमोनमः॥२३॥सर्वोवैरुद्रस्तस्मैरुद्रायनमोअस्तु।पुरुषोवैरुद्रःसन्महोनमोनमः॥

११३१

विश्वं भुतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्रः तस्मै रुद्राय नमो अस्तु ॥२४॥ कद्रुद्राय प्रचेतसे मी
ढुष्टमाय तव्यसे। वोचेम शंतमं हृदे। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥२५॥ यस्य वैकंकत्यग्निहोत्रहवणी भव
ति प्रत्येवास्याहुतयस्तिष्ठंत्यथो प्रतिष्ठित्यै ॥२६॥ कृणुष्व पाजः इति पंच। अदितिर्देवा गंधर्वा मनुष्याः पितरोऽसुरास्तेषां
सर्वभूतानां माता मेदिनी माता मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला विश्वा भूता कतमा काया सा सत्येत्य
मृतेति वसिष्ठः ॥२७॥ आपो वा इदं सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमापः सम्रा
डापो विराडापः स्वराडापः छंदांस्यापो ज्योतींष्यापो यजूंष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवः सुव
राप ओम् ॥२९॥ आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु माम्। पुनंतु ब्रह्मणस्पतिः ब्रह्मपूता पुनातु माम्।
यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम। सर्वं पुनंतु मामापोऽसतां च प्रतिग्रहं स्वाहा ॥३०॥ अग्निश्च मा
मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षंतां। यदह्ना पापमकार्षं। मनसा वाचा हस्ताभ्यां। पद्भ्यां
मुदरेण शिश्ना। अहस्तदवलुंपतु। यत्किंच दुरितं मयि। इदमहं माममृतयोनौ। सत्ये ज्योतिषि
श्चमन्युपतय [illegible] ४
जुहोमि स्वाहा ॥३१॥ सूर्यश्च मामन्युश्च मन्युकृतेभ्यः। पापेभ्यो रक्षंतां। यद्रात्र्या पापमकार्षं। मनसा वा
चा हस्ताभ्यां। पद्भ्यामुदरेण शिश्ना। रात्रिस्तदवलुंपतु। यत्किंच दुरितं मयि। इदमहं माममृतयोनौ सूर्ये
ज्योतिषि जुहोमि स्वाहा ॥३२॥ ओमित्येकाक्षरं ब्रह्म। अग्निर्देवता ब्रह्म इत्यार्षं। गायत्रं छंदं परमात्मं स्व
रूपं। सायुज्यं विनियोगं ॥३३॥ आयातु वरदा देवी अक्षरं ब्रह्म संमितं। गायत्री छंदसां मातेदं ब्रह्म जुषस्व मे॥

रितानि परासुव। यद्भद्रं तन्न आसुव। मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। मधु नक्तमु
तोषसि मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।
य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्। भ्रूणहत्यां वा एते घ्नन्ति। ये ब्राह्मणास्त्रिसुपर्णं पठन्ति। ते सोमं प्रा
प्नुवन्ति। आसहस्रात् पङ्क्तिं पुनन्ति। ब्रह्म मेधवा मधु मेधवा। ब्रह्म मेव मधु मेधवा। ब्रह्मा देवानां पदवीः कवीनामृषि
र्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन्। हंसः शुचिषद्वसुर
न्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥
ऋचे त्वा रुचे त्वा समित्स्रवन्ति सरितो न धेनाः। अन्तर्हृदा मनसा पूयमानाः। घृतस्य धारा अभिचाकशीमि। हिर
ण्ययो वेतसो मध्य आसाम्। तस्मिन्सुपर्णो मधुकृत्कुलायी। भजन्नास्ते मधु देवताभ्यः। तस्यासते हरयः सप्त
तीरे। स्वधां दुहाना अमृतस्य धाराम्। य इदं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्। वीरहत्यां वा एते घ्नन्ति।
ये ब्राह्मणास्त्रिसुपर्णं पठन्ति। ते सोमं प्राप्नुवन्ति। आसहस्रात्पङ्क्तिं पुनन्ति ॥७९॥ मेधादेवी जुषमाणा
न आगाद्विश्वाची भद्रा सुमनस्यमाना। त्वया जुष्टा नुदमाना दुरुक्तान्बृहद्वदेम विदथे सुवीराः। त्वया जुष्ट
ऋषिर्भवति देवि त्वया ब्रह्मागतश्रीरुत त्वया। त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणो न मेधे ॥८०॥
मेधां म इन्द्रो ददातु मेधां देवी सरस्वती॥ मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा। अप्सरासु च या मेधा गं
धर्वेषु च यन्मनः। दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषतां स्वाहा। आ मां मेधा सुरभिर्विश्वरूपा

॥११५॥

हिरण्यवर्णा जगती जगम्या ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषंताम्॥४१॥ मयि मेधां म
यि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयींद्र इंद्रियं दधातु मयि मेधां मयि प्रजां मयि सू
र्यो भ्राजो दधातु॥४२॥ अपैतु मृत्युरमृतं न आगन्वैवस्वतो नो अभयं कृणोतु। पर्णं वनस्पतेरिवाभि
नः शीयतां रयिः सचतां नः शचीपतिः॥४३॥ परं मृत्यो अनु परेहि पंथां यस्ते स्व इतरो देवयानात्॥
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान्॥४४॥ वाते प्राणं मनसान्वारभामहे प्रजाप
तिं यो भुवनस्य गोपाः। स नो मृत्योस्त्रायतां पात्वंहसो ज्योग्जीवा जरामशीमहि॥४५॥ अमुत्रभूयाद
धयद्यमस्य बृहस्पते अभिशस्तेरमुंचः। प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः॥४६॥
हरिं हरंतमनुयंति देवा विश्वस्येशानं वृषभं मतीनां॥ ब्रह्म सरूपमनु मेदमागादयनं मा विवधीर्वि
क्रमस्व॥४७॥ शल्कैरग्निमिंधान उभौ लोकौ सनेमहं। उभयोर्लोकयोर्ऋध्वाति मृत्युं तराम्यहं॥४८॥
मा छिदो मृत्यो मा वधीर्मा मे बलं विवृहो मा प्रमोषीः। प्रजां मा मे रीरिष आयुरुग्र नृचक्षसं त्वा हवि
षा विधेम॥४९॥ मा नो महांतमुत मा नो अर्भकं मा न उक्षंतमुत मा न उक्षितं। मा नो वधीः पितरं मो
त मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥५०॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु
रीरिषः। वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतो नमसा विधेम ते॥५१॥ प्रजापते न त्वदेतान्यन्यो विश्वा
जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां॥५२॥ स्वस्तिदा विश्

॥११५॥

स्पतिर्वृत्रहाविमृधोवशी। वृषेंद्रः पुरएतु नः स्वस्तिदा अभयंकरः॥५३॥ त्र्यंबकं यजामहे सुगंधिंपुष्टिवर्द्धनं। उर्वा
रुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥५४॥ ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हंतवे। तान्यज्ञस्य मायया
सर्वानवयजामहे॥५५॥ मृत्यवे स्वाहा मृत्यवे स्वाहा॥५६॥ देवकृतस्यैनसोवयजनमसि स्वाहा। मनुष्य
कृतस्यैनसोवयजनमसि स्वाहा। पितृकृतस्यैनसोवयजनमसि स्वाहा। आत्मकृतस्यैनसोवयजनम
सि स्वाहा। अन्यकृतस्यैनसोवयजनमसि स्वाहा। अस्मत्कृतस्यैनसोवयजनमसि स्वाहा। यद्दिवा
च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा। यत्स्वपंतश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वा
हा। यत्सुषुप्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा। यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम
तस्यावयजनमसि स्वाहा। एनस एनसोवयजनमसि स्वाहा॥५७॥ यद्वो देवाश्चकृम जिह्वया गुरु मनसो
वा प्रयुती देवहेलनं। अरावायो नो अभिदुच्छुनायते तस्मिन्तदेनो वसवो निधेतन स्वाहा॥५८॥ कामोका
र्षीन्नमो नमः॥ कामोकार्षीत्कामः करोति नाहं करोमि कामः कर्त्ता नाहं कर्त्ता कामः कारयिता नाहं का
रयिता एष ते काम कामाय स्वाहा॥५९॥ मन्युः कार्षीन्नमो नमः। मन्युरकार्षीन्मन्युः करोति नाहं करोमि
मन्युः कर्त्ता नाहं कर्त्ता मन्युः कारयिता नाहं कारयिता एष ते मन्यो मन्यवे स्वाहा॥६०॥ तिलांजुहोमि सरसांसपि
ष्टान् गंधार मम चित्ते रमंतु स्वाहा॥ गावो हिरण्यं धनमन्नपानं सर्वेषां श्रियै स्वाहा। श्रियं च लक्ष्मीं च
पुष्टिं च कीर्तिं चानृण्यतां। ब्रह्मण्यं बहुपुत्रतां। श्रद्धामेधे प्रजाः संददातु स्वाहा॥६१॥ तिलाः श्वेताः

तिलाः कृष्णाः स्तिलाः सौम्या वशानुगाः ॥ तिलाः पुनंतु मे पापं यत्किंचिद्दुरितं मयि स्वाहा। चोरस्यान्नं नवश्राद्धं ब्रह्म
हा गुरुतल्पगः। गोस्तेयं सुरापानं भ्रूणहत्या तिला शांतिं शमयंतु स्वाहा। श्रीश्च लक्ष्मीश्च पुष्टिश्च कीर्तिं
चानृण्यतां। ब्रह्मण्यं बहुपुत्रतां। श्रद्धा मेधे प्रज्ञा तु जातवेदः संददातु स्वाहा। ६२॥ प्राणापानव्यानोदान
समाना मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। वाङ्मनश्चक्षुःश्रोत्र जिह्वा घ्राणरेतो बु
ध्याकूतिः संकल्पा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। त्वक्चर्ममांस रुधिर मेदो मज्जा
स्नायवोस्थीनि मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। शिरःपाणिपादपार्श्वपृष्ठोरू
दरजंघाशिश्नोपस्थपायवो मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। उत्तिष्ठ पुरुष हरि
त पिंगल लोहिताक्षि देहि देहि ददापयिता मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। पृथिव्या
पस्तेजो वायुराकाशा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। शब्दस्पर्शरूपरसगंधा
मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। मनोवाक्कायकर्माणि मे शुध्यंतां ज्योतिरहं वि
रजा विपाप्मा भूयासं स्वाहा। ६३। अव्यक्तभावैरहंकारै ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। आत्मा मे शु
ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वा। अंतरात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं
स्वाहा। परमात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। क्षुधे स्वाहा। क्षुत्पिपासाय स्वाहा।
विविट्यै स्वाहा। ऋग्विधानाय स्वाहा। कषोत्काय स्वाहा। क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीर्नाशयाम्यहं।

अभूतिमसमृद्धिं च सर्वां निर्णुदस्मे पाप्मानं स्वाहा। अन्नमय प्राणमय मनोमय विज्ञानमय मानंदमय मात्मा मे शुध्यं
तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा॥६३॥ अग्नये स्वाहा। विश्वेभ्यो देवेभ्य स्वाहा। ध्रुवाय भूमाय स्वाहा। ध्रुव
क्षितये स्वाहा। अच्युतक्षितये स्वाहा। अग्नये स्विष्टकृते स्वाहा। धर्माय स्वाहा। अधर्माय स्वाहा। अद्भ्य स्वाहा। ओष
धिवनस्पतिभ्य: स्वाहा॥१॥ रक्षो देवजनेभ्य: स्वाहा। गृह्याभ्य: स्वाहा। अवसानेभ्य: स्वाहा। अवसानपतिभ्य: स्वा
हा। सर्वभूतेभ्य स्वाहा। कामाय स्वाहा। अंतरिक्षाय स्वाहा। यदेजति जगति यच्च चेष्टति नाम्नो भागोयं नाम्ने स्वाहा॥
पृथिव्ये स्वाहा। अंतरिक्षाय स्वाहा॥२॥ दिवे स्वाहा। सूर्याय स्वाहा। चंद्रमसे स्वाहा। नक्षत्रेभ्य: स्वाहा। इंद्राय स्वा
हा। बृहस्पतये स्वाहा। प्रजापतये स्वाहा। ब्रह्मणे स्वाहा। स्वधा पितृभ्य: स्वाहा। नमो रुद्राय पशुपतये स्वाहा॥३॥
देवेभ्य: स्वाहा। पितृभ्य स्वधा अस्तु। भूतेभ्यो नम:। मनुष्येभ्यो हंता। प्रजापतये स्वाहा। परमेष्ठिने स्वाहा। यथा
कूप: शतधार: सहस्रधारो अक्षित: एवामे अस्तु धान्यं सहस्रधारमक्षितं। धनधान्यै स्वाहा। ये भूता: प्र
चरंति दिवा नक्तं बलिमिच्छंतो वितुदस्य प्रेष्या:। तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपति र्ददातु स्वा
हा॥४॥ ओषधिवनस्पतिभ्य: स्वाहा। नमो रुद्राय पशुपतये स्वाहा। विदुदस्य प्रेष्येकं च॥६४॥ ओं तद्ब्रह्म।
ओं तद्वायु:। ओं तदात्मा। ओं तत्सत्यं। ओं तत्सर्वं। ओं तत्पुरोर्नम:। अंतश्चरति भूतेषु गुहायां विश्वमूर्तिषु। त्वं यज्ञ
स्त्वं वषट्कारस्त्वमिंद्रस्त्वं [illegible] रुद्रस्त्वं विष्णुस्त्वं ब्रह्मत्वं प्रजापति:। त्वं तदाप आपो ज्योती रसोमृतं ब्रह्म भूर्भुव:
सुवरों॥६५॥ श्रद्धायां प्राणे निविष्टोमृतं जुहोमि। श्रद्धायामपाने निविष्टोमृतं जुहोमि। श्रद्धायां व्याने निविष्टो

॥प्राणाय स्वाहा॥ ॥अपानाय स्वाहा॥ ॥व्यानाय स्वाहा॥

संनिष्ठस्य यइत्यां मनुसं। तिष्ठस्योपतेय इउपतेनमउपतेनमः॥७४॥ सत्यं परंपरं सत्यं सत्येनसुवर्गाल्लोकान्च्यवंते कदाचनस
तां हिसत्यंतस्मात्सत्येरमंते तप इति तपो नानशनात्परं यद्धिपरं [illegible] तपस्तद्दुर्धर्षं तद्दु[illegible]राधर्षंतस्मात्तपसिरमं
९२३ ते दम इति नियतं ब्रह्मचारिणस्तस्माद्दमेरमंते शम इत्यरण्येमुनयस्तस्माच्छमेरमंते दानमितिसर्वाणिभूतानिप्रशंसंति दाना
न्नातिदुष्करंतस्माद्दानेरमंते धर्मइतिधर्मेणसर्वमिदंपरिगृहीतं धर्मान्नातिदुष्करं तस्माद्धर्मेरमंते प्रजनइतिभू
यांसस्तस्माद्भूयिष्ठाःप्रजायंते तस्माद्भूयिष्ठाः प्रजननेरमंते अग्नय इत्याह तस्मादग्नयआधातव्या अग्निहोत्र
मित्याह तस्मादग्निहोत्रेरमंते यज्ञइति यज्ञोहिदेवास्तस्माद्यज्ञेरमंते मानसमितिविद्वांसस्तस्माद्विद्वांस
सएवमानसेरमंते न्यासइतिब्रह्मा ब्रह्माहिपरः परोहिब्रह्मा तानिवा एतान्यवराणि पराणि न्यासएवात्यरे
चयय एवंवेदेत्युपनिषत्॥७५॥ प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितरमुपससार किं भगवंतः परम
मंवदंतीति तस्मै प्रोवाच सत्येन वायुरावाति सत्येनादित्योरोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मा
त्सत्यंपरमंवदंति तपसा देवा देवता मग्रआयन् तपसऋषयः सुवरन्वविंदन् तपसासपत्नान्प्रणुदामारातीस्तपसि
सर्वं प्रतिष्ठितंतस्मात्तपः परमंवदंति दमेन दांताः किल्बिषमवधून्वंति दमेन ब्रह्मचारिणः सुवरगच्छन् दमोभूतानां
दुराधर्षं दमेसर्वंप्रतिष्ठितं तस्माद्दमःपरमंवदंति शमेन शांताः शिवमाचरंति शमेन नाकं मुनयोन्वविंदन् शमोभू
तानांदुराधर्षं शमेसर्वंप्रतिष्ठितं तस्माच्छमःपरमंवदंति दानं यज्ञानां वरूथं दक्षिणा लोके दातारं सर्वभूतान्यु
पजीवंति दानेनारातीरपानुदंत दानेन द्विषंतोमित्राभवंति दानेसर्वं प्रतिष्ठितं तस्माद्दानंपरमंवदंति धर्मो

ष्ठा लोके धर्मिष्ठं प्रजा उपसर्पंति धर्मेणापापमपनुदंति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदंति प्रजननं वै प्रतिष्ठा लोके
साधु प्रजायास्तंतुं तन्वानः पितॄणामनृणो भवति तदेव तस्या अनृणं तस्मात्प्रजननं परमं वदंत्यग्नयो वै त्रैविद्या पि २
देवयानः पंथा गार्हपत्य ऋक्पृथिवी रथंतरमन्वाहार्यपचनं यजुरंतरिक्षं वामदेव्यमाहवनीयः साम सुवर्गो लोको
बृहत्तस्मादग्नीन्परमं वदंत्यग्निहोत्रं सायंप्रातर्गृहाणां निष्कृतिः स्विष्टं सुहुतं यज्ञक्रतूनां प्रायणं सुवर्गस्य
लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदंति यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरानपानुदंत यज्ञेन द्वि
षंतो मित्रा भवंति यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदंति मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु
पश्यति मानसा ऋषयः प्रजा असृजंत मानसे सर्वं प्रतिष्ठितं तस्मान्मानसं परमं वदंति न्यास इत्याहुर्मनीषि
णो ब्रह्माणं ब्रह्मा विश्वः कतमः स्वयंभु प्रजापतिः संवत्सर इति संवत्सरोसावादित्यो य एष आदित्ये पुरुषः पर
मेष्ठी ब्रह्मात्मा याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधिवनस्पतयः प्रजायंते ओ
षधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषया
मनो मनसा शांतिः शांत्या चित्तं चित्तेन स्मृतिं स्मृत्या स्मारं स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति तस्मा
दन्नं ददन्सर्वाण्येतानि ददात्यन्नात्प्राणा भवंति भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानंदो ब्र
ह्मयोनिः स वा एष पुरुषः पंचधा पंचात्मा येन सर्वमिदं प्रोतं पृथिवी चांतरिक्षं च द्यौश्च दिशश्चावांतरदि
शाश्च स वै सर्वमिदं जगत्स स भूतं स भव्यं जिज्ञासक्लृप्त ऋतजा रयिष्ठाः श्रद्धा सत्यो महस्वान्तपसो

वारिष्ठाः स्थाता तमेवमनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान्तस्मान्न्यासमेषां तपसामतिरिक्तमाहुर्वसुरण्वो विभूरसि
प्राणे त्वमसि संधाता ब्रह्मन्त्वमसि विश्वधृत्तेजोदास्त्वमस्यग्निरसि वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमस उपयामगृ
हीतोऽसि ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीतैतद्वै महोपनिषदं देवानां गुह्यं य एवं वेद ब्रह्मणो महिमानमाप्नोति तस्माद्ब्र
ह्मणो महिमानमित्युपनिषत् ॥७६॥ तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हि
र्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो
ब्रह्मा श्रोत्रमग्नीत् यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यत्संचरत्यु
पविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्स
मिधं यत्प्रातर्मध्यन्दिनं सायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्या
नि य ऋतवस्ते पशुबन्धा ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणाः सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ एतद्वै जरा
मर्यमग्निहोत्रं सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते
पितॄणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं सलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभि
जयति तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानम् ॥७७॥ ॥ इति श्री तैत्तीरीयशाखायामारण्य
के [illegible] दशमः प्रश्नः ॥७८॥